Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११६६ घ

Title ब्रम्ह यज्ञविधानम्

Author दिवाकरः

Extent ६ Age

Subject धर्मशास्त्रम्

✓

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ब्रह्मयज्ञविधानम्

११६६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ
मं पाठी
१

ॐ अथ ब्रह्मयज्ञः ॥ ॐ श्रीगणेशाय नमः ॥ ॐ आचम्य प्रा
णानायम्य ॥ उदकं गृहीत्वा ॥ हृः परिमृज्य ॥ सव्यहस्तउपस्पृ
श्य ॥ सर्वपापानि मोचति ॥ शिरः चक्षुषि नासिके श्रोत्रे
हृदयमालभ्य ॥ अप उपस्पृश्य ॥ विष्णुर्विष्णुः प्रणवस्य
भूर्भुवः स्वरों ॥ ॐ अद्य पूर्वोच्चरितएवंगुणविशेषण
विशिष्टायां शुभपुण्यतिथौ श्रीपरमेश्वरप्रीत्यर्थं ब्रह्म
यज्ञेनयक्ष्ये ॥ पृथ्वीत्यस्य मन्त्रस्य ॥ मेरुपृष्ठऋषिः ॥ कूर्मो
देवता ॥ सुतलं छन्दः ॥ आसने विनियोगः ॥ पृथ्वी त्वया धृ
ता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पवित्रं कृत्वासनं ॥ ओं अपसर्पन्तु ये भूता ये भूता भू-
मिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञ-
या ॥ अनेन भूतानुत्साद्य ॥ अपक्रामन्तु भूतानि पि-
शाचाः सर्वतो दिशं ॥ सर्वेषामविरोधेन ब्रह्मकर्मस-
मारभेत् ॥ विद्युदसि विद्य मे पाप्मानमृतात्सत्य-
मुपैमि ॥ तज्जलमभिमृश्य दर्भगर्भे ब्रह्मांजलिं ॥
निधाय ॥ प्रणवस्य परब्रह्म ऋषिः ॥ परमात्मा देवता
दैवी गायत्री छंदः ॥ व्याहृतीनां जमदग्निर्भरद्वाज-
भृगवऋषयः ॥ अग्निर्वायुः सूर्यो देवताः ॥ दैवी गाय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ नोत्र २

त्रीछंदः ॥ व्याहृतीनां जमदग्निर्भरद्वाजभृगवऋषयः
अग्निर्वायुःसूर्योदेवताः ॥ देवीगायत्रीदेवीत्रिष्टुब्देवी
बृहत्यश्छंदांसि ॥ गायत्र्याविश्वामित्रऋषिः सविता दे
वतागायत्रीछंदः ॥ प[illegible]ोहृ[illegible]शः ॥ ॐ भूर्भुवस्वः ॐ
तत्सवितुर्वरेण्यं ॥ ॐ भर्गोदेवस्यधीमही ॐ धियो
योनः प्रचोदयात् ॥ ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य
धीमहिः ॐ धियोयोनःप्रचोदयात् ॥ ॐ अग्निमीळे
इत्यादीनांछंदसामधुछंदादयोऋषयः ॥ अग्न्याद
योदेवताः ॥ गायत्र्यादीनिछंदांसि ब्रह्मयज्ञेवि २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विनियोगः ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं
होतारं रत्नधातमं अग्निः पूर्वेभिरृषिभिरीड्यो नूत
नैरुत स देवाँ एह वक्षति अग्निना रयिमश्नवत्पोषमे
व दिवे दिवे यशसं वीरवत्तमं अग्ने यं यज्ञमध्वरं विश्व
तः परिभूरसि स इद्देवेषु गच्छति अग्निर्होता कविक्र
तुः सत्यश्चित्रश्रवस्तमः देवो देवेभिरा गमत् यदं
गदाशुषे त्वमग्ने भद्रं करिष्यसि तवेत्तत्सत्यमंगिरः
उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयं नमो भरंत
एमसि राजंतमध्वराणां गोपामृतस्य दीदिविं वर्धमा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ मंत्र २ 3

तं स्वेदमे || स नः पितेव सूनवे ग्ने सूपायनो भवा || स च
स्वा नः स्वस्तये || वायवायाहि दर्शता || इषे त्वोर्जे त्वा || अ
ग्न आयाहि वीतये || शन्नो देवीरभिष्टये || अग्निर्वै दे
वानामवमो विष्णुः परमः || अथ महाव्रतं || एष पंथा
एतत्कर्म || अथातः संहिताया उपनिषत् || विदा मघ
वन्विदा महाव्रतस्य पंचविंशतिं सामिधेन्यः || अथैत
स्य समाम्नायस्य समाम्नायः समाम्नातः || मयरसत
जभनलगसंम्मितं || पंच संवत्सरमयं || अथ शिक्षां
प्रवक्ष्यामि || गौः ग्मा || वृद्धिरादैच् || अथातो धर्मं व्याख्या २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ऊ
र्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुःष्पदे ॥

स्याम ॥ यथा नो धर्मजिज्ञासा ॥ यथा नो ब्रह्मजिज्ञासा
योगीश्वरं याज्ञवल्क्यं ॥ नारायणं नमस्कृत्य ॥ तच्छंयो
रावृणीमहे ॥ हरिः ॐ ॥ नमो ब्रह्मणे ॥ हरिः ॐ ॥ प्रजापति
स्तृप्यतु ॥ ब्रह्मा तृप्यतु ॥ वेदास्तृप्यन्तु ॥ देवास्तृप्यन्तु ॥
ऋषयस्तृप्यन्तु ॥ सर्वाणि छन्दांसि तृप्यन्तु ॥ ओंकार ।
स्तृप्यतु वषट्कारस्तृप्यतु ॥ व्याहृतयस्तृप्यन्तु ॥ सा
वित्री तृप्यतु ॥ यज्ञास्तृप्यन्तु ॥ द्यावापृथिवी तृप्येतां
अन्तरिक्षं तृप्यतु ॥ अहोरात्राणि तृप्यन्तु ॥ सांख्यास्तृ
प्यन्तु ॥ सिद्धास्तृप्यन्तु ॥ समुद्रास्तृप्यन्तु ॥ नद्यस्तृप्यन्तु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऊं
तर्प·
५

गिरयस्तृप्यंतु॥ क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसःस्तृ-
प्यंतु॥ नागास्तृप्यंतु॥ वयांसि तृप्यंतु॥ गावस्तृप्यंतु॥
साध्यास्तृप्यंतु॥ विप्रास्तृप्यंतु॥ यक्षास्तृप्यंतु॥ रक्षां-
सि तृप्यंतु॥ भूतानि तृप्यंतु॥ एवमंतानि तृप्यंतु॥
उपवीती॥ अथ ऋषयः॥ शतर्चिनस्तृप्यंतु॥ मा-
ध्यमास्तृप्यंतु॥ गृत्समदस्तृप्यंतु॥ विश्वामित्रस्तृ-
प्यंतु॥ वामदेवस्तृप्यंतु॥ अत्रिस्तृप्यंतु॥ भरद्वाज-
स्तृप्यंतु॥ वसिष्ठस्तृप्यंतु॥ प्रगाथास्तृप्यंतु॥ पाव- ध
मान्यस्तृप्यंतु॥ क्षुद्रसूक्तास्तृप्यंतु॥ महासूक्तास्तृप्यंतु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्राचीनावीती ॥ सुमंतुजैमिनिवैशंपायनपैलसू
त्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु। जा
नंतिबाहवीगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्य
मांडूकेयास्तृप्यंतु ॥ गार्गीवाचक्नवीतृप्यतु ॥ वडवा
प्रातिथेयीतृप्यतु ॥ सुलभामैत्रेयीतृप्यतु ॥ कहोडं
तर्पयामि ॥ कौषीतकं तर्पयामि ॥ महाकौषीतकं तर्प
यामि ॥ पैंगं तर्पयामि ॥ महापैंगं तर्पयामि ॥ सुय
ज्ञं तर्पयामि ॥ सांख्यायनं तर्पयामि ॥ ऐतरेयं तर्प

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ अश्वलो॰ ५

5

महौदवाहिं तर्पयामि ३ सौजामिं तर्पयामि ३

यामि ॥ [illegible] ॥ महैतरेयं तर्पयामि ॥
शाकलं तर्पयामि ॥ बाष्कलं तर्पयामि ॥ सुजातवक्त्रं
तर्पयामि ॥ औदवाहिं तर्पयामि ॥ शौनकं तर्पया-
मि ॥ आश्वलायनं तर्पयामि ॥ ये चान्येऽत्राचार्यास्ते स-
र्वे तृप्यन्तु ॥ अथ पितृतर्पणं ॥ आब्रह्मस्तम्भपर्यन्तं देव-
ऋषिपितृमानवाः तृप्यन्तु पितरः सर्वे मातृमा-
तामहादयः ॥ अतीतकुलकोटीनां सप्तद्वीपनि-
वासिनां ॥ आब्रह्मभुवनाल्लोकान्मे च निष्पीडनोदकं ५

इदमस्तु तिलोदकं ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

इदमस्तु तिलोदकं अक्षय्यमस्तु ॥ यस्य स्मृत्या च नामो-
क्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति स-
द्यो वंदे तमच्युतं ॥ अनेन ब्रह्मतर्पणेन कर्मणा ॥
श्रीभगवान् परमेश्वरः प्रीयतां न मम ॥ ॥ ॥

समाप्त

॥१ केचास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते गृह्णन्तु मया दत्तं
वस्त्रनिष्पीडनोदकं ॥२॥ माता बाचतयें सपत्नजननी मातामह
दिवंशे स्यास्रिभिर्तदि मातजननी स्वभ्रातरः स्वस्त्रियाः ॥ ता
वा-स भ भगिन्यपत्य धव युक् जायापितासस्रूः ॥ शिष्याप्तापित

9

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative